श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीपराङ्कुशाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीपराङ्कुशाष्टकम् ॥

त्रैविद्यवृद्धजनमूर्धविभूषणं यत्
सम्पच्च सात्त्विकजनस्य यदेव नित्यम्।
यद्वा शरण्यमशरण्यजनस्य पुण्यं
तत्संश्रयेम वकुळाभरणाङ्घ्रि युग्मम्॥ १॥

भक्तिप्रभाव भवदद्भुतभावबन्ध
सन्धुक्षित प्रणयसाररसौघ पूर्णः।
वेदार्थरत्ननिधिरच्युतदिव्यधाम
जीयात्पराङ्कुश पयोधिरसीम भूमा॥ २॥

ऋषिं जुषामहे कृष्णतृष्णातत्त्वमिवोदितम्।
सहस्रशाखां योऽद्राक्षीद्द्राविडीं ब्रह्मसंहिताम्॥ ३॥

यद्गोसहस्रमपहन्ति तमांसि पुंसां
नारायणो वसति यत्र सशङ्खचक्रः।
यन्मण्डलं श्रुतिगतं प्रणमन्ति विप्राः
तस्मै नमो वकुळभूषण भास्कराय॥ ४॥

पत्युः श्रियः प्रसादेन प्राप्त सार्वज्ञ संपदम्।
प्रपन्न जनकूटस्थं प्रपद्ये श्रीपराङ्कुशम्॥ ५॥

शठकोपमुनिं वन्दे शठानां बुद्धि दूषणम्।
अज्ञानां ज्ञानजनकं तिन्त्रिणीमूल संश्रयम्॥ ६॥

वकुळाभरणं वन्दे जगदाभरणं मुनिम्।
यः श्रुतेरुत्तरं भागं चक्रे द्राविड भाषया॥ ७॥

वकुळालङ्कृतं श्रीमच्छठकोप पदद्वयम्।
अस्मत्कुलधनं भोग्यमस्तु मे मूर्ध्नि भूषणम्॥ ८॥

www.prapatti.com

नमज्जनस्य चित्तभित्ति भक्ति चित्र तूलिका
    भवाहिवीर्य भञ्जने नरेन्द्र मन्त्र यन्त्रणा।
प्रपन्न लोक कैरव प्रसन्न चारु चन्द्रिका
    शठारि हस्त मुद्रिका हठाद्धुनोतु मे तमः॥ ९ ॥

॥ इति श्रीपराङ्कुशाष्टकं संपूर्णम् ॥

www.prapatti.com